# Shri Raghavendra Bandhamochana Kavacham

# શ્રીરાઘવેન્દ્રબન્ધમોચનકવચમ્

## Document Information

Text title : Shri Raghavendra Bandhamochana Kavacham

File name : rAghavendrabandhamochanakavacham.itx

Category : deities_misc, gurudev, kavacha

Location : doc_deities_misc

Author : Krishna Avadhutapandita Vedavyasacharya

Proofread by : Gopalakrishnan, PSA Easwaran

Description/comments : from Raghavendra Tantram

Latest update : December 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 18, 2021

*sanskritdocuments.org*

# શ્રીરાઘવેન્દ્રબન્ધમોચનકવચમ્

અથ શ્રીરાઘવેન્દ્રાર્યકવચં મન્ત્રનામજમ્ ।
કલૌ પ્રત્યક્ષફલદં બહ્નાયાસેન વૈ વિના ॥ ૧॥

ગુરોઃ પુત્રોઽવધૂતોઽહં વક્ષ્યે છન્દસ્યનુષ્ટુભિઃ ।
રાં બીજં ચ નમઃ શક્તી રાઘવેન્દ્રાય કીલકમ્ ॥ ૨॥

શ્રિતજનસુરધેનૌ શ્રીસુધીન્દ્રાર્યસૂનૌ
    દુરિતતિમિરભાનૌ દુર્દશાયાઃ કૃશાનૌ ।
વિરચિતભયહાનૌ વામહસ્તેઽત્ર જાનૌ
    મમ વસતુ યતીન્દ્રે માનસં રાઘવેન્દ્રે ॥ ૩॥

ૐ શ્રીં શ્રીરાઘવેન્દ્રાર્યગુરુરાજઃ શિરોઽવતુ ।
ૐ રાં રામમહાવીરારાધકોઽવતુ સોઽલિકમ્ ॥ ૪॥

ૐ ઘં ઘનતરાપત્તિહરણો રક્ષતુ ભ્રુવૌ ।
ૐ વેં વેઙ્કટશૈલેશપૂજકોઽવતુ ચાક્ષિણે ॥ ૫॥

ૐ દ્રાં દ્રાવયિતારાતિઃ કર્ણાવવતુ સન્તતમ્ ।
ૐ યં યતીશ્વરો નાસાં ૐ નં નમ્યઃ કપોલકૌ ॥ ૬॥

ૐ મં માન્નોઽવતાજ્જિહ્વાં ૐ મં મસ્કરભૃદ્ગલમ્ ।
ૐ નં નારાયણપ્રેષ્ઠઃ સ્કન્ધદેશં સદાઽવતુ ॥ ૭॥

ૐ યં યક્ષાદિભયહા વક્ષઃ પાતુ નિરન્તરમ્ ।
ૐ દ્રાં દ્રાક્ છિન્નસર્વારિબન્ધનોઽવ્યાદ્ભુજૌ સદા ॥ ૮॥

ૐ વેં વેપિતશત્રુશ્ચ હસ્તૌ રક્ષતુ સર્વદા ।
ૐ ઘં ઘોરવિષબાધાપરિહર્તાઽવતૂદરમ્ ॥ ૯॥

ૐ રાં રાજાદિ નિર્બન્ધછેદકૃત્પાતુ પાર્શ્વયોઃ ।
ૐ શ્રીં શ્રીહનુમદ્ભક્તઃ કટિં મધ્યં ચ રક્ષતુ ॥ ૧૦॥

ॐ શ્રીં શ્રીલજનસ્તુત્યો ગુહ્યં રક્ષતુ શાશ્વતમ્ ।
ॐ રાં રાષ્ટ્રક્ષેમકરો ઊરૂ રક્ષતુ જાનુની ॥ ૧૧॥

ॐ ઘં ઘનાઙ્ગો જઙ્ઘે ચ ॐ વેં વેદાન્તવેદકઃ ।
ॐ ગુલ્મૌ રક્ષતુ પાદૌ તુ ॐ દ્રાં દ્રુતગતિપ્રદઃ ॥ ૧૨॥

ॐ યં યમનિધિઃ પૃષ્ઠં ॐ નં ચિત્તં નતાખિલઃ ।
ॐ મં માતૃદોષઘ્નઃ સર્વાઙ્ગાન્યપિ રક્ષતુ ॥ ૧૩॥

માલામન્ત્રસ્તોત્રં -
ॐ નમઃ શ્રીરાઘવેન્દ્રાય નમો ભગવતે
રાં રાઘવભક્તાય, ઘં ઘનાનન્દાય, વેં વેતાલાદિ ભયહારિણે,
દ્રાં દ્રાક્ પ્રપન્નાય, યં યક્ષરક્ષોવિનાશાય,
નં નામસઙ્કીર્તનતુષ્ટાય, મં મહામોદપ્રદાય સ્વાહા ।
સ્મરણમાત્રસન્નિહિતાયઽમિત્રાન્મિત્રીકુરુ મિત્રીકુરુ,
વૌષઢાકૃષ્ટાષ્ટૈશ્વર્યચર્યાય
પરમન્ત્ર-તન્ત્ર-પાશાદિ બન્ધં છિન્ધિ છિન્ધિ ।
હુઁ ભક્તવજ્રકવચરૂપાય,
પરકૃતશસ્ત્રાસ્ત્રવિશ્વચેષ્ટકં ભઞ્જય ભઞ્જય ।
વષટ્ પ્રકાશરૂપાય, મમ સુદૈવં પ્રકાશય પ્રકાશય ।
ફટ્ દણ્ડધરાય, શૃઙ્ખલાબન્ધનં સ્ફોટય સ્ફોટય ।
ભેદય, ભેદય, માં રક્ષ, માં રક્ષ, સર્વવિપદઃ શમય, શમય
સર્વસમ્પદઃ સમ્પાદય સમ્પાદય હું ફટ્ સ્વાહા ઓમ્ ॥ ૧૪॥

ॐ એતચ્છ્રીરાઘવેન્દ્રાર્યગુરુરાજઃ કૃપાનિધિઃ ।
માલામન્ત્રાત્મકં સ્તોત્રં સપાદદ્વિશતાર્ણકમ્ ॥ ૧૫॥

મન્ત્રરાજાત્મકં બન્ધમોચકં કવચં શુભમ્ ।
શત્રુકૃત્યાદિશમનં ત્રિવારં પઠતાં દિને ॥ ૧૬॥

યથાયોગ્યં સપ્તકં વા દ્વિસપ્તકમથાઽપિ વા ।
ત્રિસપ્તકં મણ્ડલં વા ત્રિપક્ષં વા વિચક્ષણઃ ॥ ૧૭॥

તામ્રપત્રે ચન્દનેન પરિલિપ્તેઽષ્ટકોણકમ્ ।
પદ્મં લિખિત્વા તત્પત્રે મન્ત્રમષ્ટાક્ષરં ગુરોઃ ॥ ૧૮॥

અનુલોમાલ્લિખિત્વાઽથ તદ્બહિશ્ચ વિલોમતઃ ।

લિખિત્વા કર્ણિકાયાં તુ રાં બીજં વિલિખેત્ ગુરોઃ ॥ ૧૯॥

વિલિખેત્ રાં ચતુર્દિક્ષુ વિલિખેન્મં વિદિક્ષુ ચ ।
આવાહ્ય પૂજયેત્ તત્ર રાઘવેન્દ્રગુરું તથા ॥ ૨૦॥

હનૂમન્તં રાઘવં ચ પ્રજ્વાલ્ય ઘૃતદીપકમ્ ।
વર્તિકાષ્ટકસંયુક્તં ગન્ધપુષ્પાક્ષતાદિભિઃ ॥ ૨૧॥

સમ્પૂજ્ય ફલપાનીયૈર્નિત્યમષ્ટોત્તરં શતમ્ ।
પશ્ચિમાભિમુખો જપ્ત્વા મુચ્યતે સર્વબન્ધનાત્ ॥ ૨૨॥

અપ્પણણાર્યસ્તવં પૂર્વં તતશ્ચાષ્ટાક્ષરં મનુમ્ ।
અષ્ટોત્તરં જપિત્વાઽથ સમન્ત્રકવચં જપેત્ ॥ ૨૩॥

પ્રદોષેહ્યર્થરાત્રે વા શ‌ૃઙ્ખલાદિકબન્ધતઃ ।
મુચ્યતે નાત્ર સન્દેહો ગુરુરાજપ્રસાદતઃ ॥ ૨૪॥

પ્રજપેત્ પૂર્વવન્નિત્યં માલામન્ત્રાર્ણસઙ્ખ્યયા ।
મહાનિર્બન્ધતો મુચ્યેદવધૂતવચો યથા ॥ ૨૫॥

સકૃદ્વા યઃ પઠેન્નિત્યં પ્રદોષે ગુરુસન્નિધૌ ।
માર્ગેઽ।રણ્યે દ્વિષન્મધ્યે ચોરસર્પાદિ બન્ધને ॥ ૨૬॥

પ્રભાતે વા નિશાયાં વા મુચ્યતે સર્વતો ભયાત્ ।
સન્તતિં સમ્પદં સૌખ્યં લભતે તત્પ્રસાદતઃ ॥ ૨૭॥

શ્રીરાઘવેન્દ્રં ધૃતદૃષ્ટદણ્ડં
    કાષાયવસ્ત્રં કમનીયવેષમ્ ।
ભજેત્ સદા ભક્ત ભયૌઘનાશ-
    બદ્ધાદરં રામકપીશભક્તમ્ ॥ ૨૮॥

ઇતિ શ્રીમત્કૃષ્ણાવધૂતપણ્ડિતકૃતૌ શ્રીરાઘવેન્દ્રતન્ત્રે
શ્રીરાઘવેન્દ્રબન્ધમોચનકવચં નામ ષષ્ઠપટલઃ સમ્પૂર્ણઃ ।

Proofread by Gopalakrishnan, PSA Easwaran

*Shri Raghavendra Bandhamochana Kavacham*

pdf was typeset on December 18, 2021

Please send corrections to *sanskrit@cheerful.com*